**ARYAVART SHODH VIKAS PATRIKA**
ISSN No.: 2347-2944, RNI TITLED No: UPBIL04292,
RNI REG.No.:UPBIL/2014/66218, SOCI.REG. No. 561/2013-14
**Vol.-5, No.-I, PP-228-232, YEAR JUNE 2016**

# संस्कृते राष्ट्रभावना

☐ **डॉ0 महेश कुमार द्विवेदी**

***सारांश*** – *निबन्धेऽस्मिन् संस्कृतस्य राष्ट्रस्य वा प्रास्ताविकन्न प्रासङ्गिकं तथापि राष्ट्रैक्यसंस्कृतयोः समुपस्थापने पृष्ठभूमिरावश्यकीति मत्वा प्रथमं संस्कृतस्य पश्चात्राष्ट्रस्यानन्तरं चोभयार्बोधो उपस्थाप्यते। संस्कृतन्न केवलं वेदवेदाङ्गानां न वा पुराणानां पण्डितानां भाषाऽपितु सम्पूर्णे संसारे इयं भाषा निजां समृद्धिं उच्चस्तरीयसाहित्ये प्रभाविभूमिकयाऽद्यतनं यावत् विश्वसांस्कृतिकपटले च सूर्यवत् विश्वजनीनमभिचकास्ते। विश्वस्यादिभाषात्वेन देवभाषारूपेण त्रिकालदर्शिज्ञानविज्ञान– –सरण्याः प्रकाशिकात्वेन, संस्कारमयीत्वेन, विविधभाषाणां जननीत्वेन ख्यातिनामा कीर्तिरूपेयं सर्वैरङ्गीक्रियते। विश्वगुरुत्वेन भारतस्य प्रतिष्ठायै संस्कृतस्यैव मौलिकमवदानं मन्यते च। प्राच्यभारतस्य शिक्षाशास्त्रं, छन्दशास्त्रं, योगशास्त्रं, दर्शनशास्त्रं, नाट्यशास्त्रं, अर्थशास्त्रं, चिकित्साशास्त्रं, कामशास्त्रं, नीतिशास्त्रं, राजनीतिशास्त्रं, साहित्यशास्त्रमित्येतानि बहूनि कारण्यासन् भारतस्य विश्वगुरुत्वे।*

अत्रैव शिल्पकला, चित्रकला, वास्तुकला, चतुःषष्टिविद्यापरिपाकः, प्रतिफलति। प्रातिशाख्येषु वर्णोच्चारणकला, ध्वनिविज्ञानं, व्याकरणशास्त्रं, मीमांसाशास्त्रादीनां विश्वव्यापिप्रभुत्वेन विश्वगुरुरित्युपाधित्वे–नायं भारतोऽलङ्कृत आसीत्। सर्वोच्चचिन्तनशैल्याप्रतिष्ठापकत्वेनैतद्देशविशेषे इयमु––क्तिरनादिकालात् प्रचलिता समायाति– 'भारतस्य प्रतिष्ठे द्वे संस्कृतिः संस्कृतं तथा'।

न केवलं शासनकरणतयाऽपितु विश्वविदितसुचिन्तकानामुपस्थित्यैवास्य देशस्य प्रतिष्ठा अक्षुण्णाऽऽसीत्। यास्क–पाणिनि–पतंजलि–गौतम–भर्तृहरि–भरतमुनि–कालिदास–धन्वन्तरि–आर्य भट्ट–वाराहमिहिर–कौटिल्य–वात्स्यायन–कणाद–कपिलेत्यादिलब्ध– प्रतिष्ठवैज्ञानिकानां सहकारैरयं भारतः प्रतिभारत आसीत्। एतत्सर्वं विस्तरेण उपजीव्यत्वेन प्रतिपादितं उत्तरवर्तिसाहित्ये अस्माभिर्ज्ञायते पठ्यते च। विश्वगुरुत्वेन विश्वबन्धुत्वसदृशाः राष्ट्रैक्यभावाः संस्कृत एव नान्यस्यां भाषायां प्राप्यन्ते।

राष्ट्रं नाम राजते इति राष्ट्रम् (राज्धातोः ष्ट्रन्–प्रत्यये) कृते सति राष्ट्रशब्दो निष्पद्यते। संक्षेपेण नगर–जनपद–राज्यानां स्वतंत्रात्मकसमूह एव राष्ट्रम्। यत्र सभ्यतासंस्कृतिजातिधर्मपन्थावलम्बिनां जनानां सर्वतोभावेन एकेन नायकेन संरक्षिता अभ्युदयशीला प्रणाली। सांस्कृतिक–सामाजिक–भाषागत–विचार–साहित्य–चैतन्यात्मिकाभावप्रधाना एकता राष्ट्रिया एकता कथ्यते। राष्ट्रस्य समुन्नतिर्देशभक्तिपूर्णा धारणैव। विस्तरेणैवं भाषा–साहित्ये आदर्श–रीति–पौराणिक–परम्पराबद्धीभूय आन्तरिकमैक्यमनुभवन् जनसमूहः तत्समूहानां सामूहिकी चेतना, आध्यात्मकी सम्पदा मनोवैज्ञानिकता, तन्मध्ये भौगोलिकमैक्यं, सुरक्षाभावना, विचारसाम्यतादयः राष्ट्रीयैक्यमूलकाः कथ्यन्ते। भारतभूमावस्यां संस्कृति–सभ्यता–धर्म–कला–साहित्य–जीवनादर्शं प्रति मानवमानसे स्वाभाविकं स्वाभिमानं तिष्ठति। सैव राष्ट्रिया एकता कथ्यते। यतो हि– 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी इत्येषा भावना राष्ट्रचेतनायाः मूलम्। मातृभूमिं, मातृसंस्कृतिं, मातृभाषां प्रति समादरमपि राष्ट्रीयमैक्यमुच्यते।

मातृभूमि–मातृसंस्कृति–मातृभाषां प्रति समादरणमपि राष्ट्रैक्यम्। राष्ट्रीयैकतायाः यावन्तिसूत्राणि तानि सर्वाण्यपि संस्कृतवाङ्मयस्य विभिन्नविधासु समुपलभ्यन्ते लौकिकप्रवृत्तिषु–लोकव्यवहारसाम्मनस्य–बन्धुत्व–सौहार्द–राष्ट्रप्रेम–सद्भावना–परोपकार–कौशल्य–परिवारकल्याण–सहिष्णुता–बन्धुजनसहगामिता–त्याग–शान्तीत्यादयाः सूत्रात्वेनोच्यन्ते। लोकमूलकाः एताः प्रवृत्तयः। लोकः संसारो वा

सहायक आचार्य, श्री एकरसानन्द आदर्श संस्कृत महाविद्यालय, मैनपुरी (उ0प्र0) भारत

आधिदैविक–आधिभौतिक–आध्यात्मिकादि–तिसृषु अवधारणासु समाश्रितः। दैवमधिकृत्य दैवीशक्त्या कारणात्मिकया प्रकृत्या लोकस्य सत्ता, भूतमधिकृत्य भौतिकप्रवृत्या मानवानां तत्सम्बद्धवस्तूनां च बोधः, आत्मानमवलम्ब्य मानवीयस्थावरजङ्गमात्कानां च चैतन्यमादयः ज्ञायन्ते। आत्मचेतनया सह समेषां राष्ट्रियाणामेकतारूपा प्रवृत्तिस्तु स्वाभाविकी। परं चात्र धर्म–दर्शनोपास्य–भाषा–रीति–नीति–ज्ञान–विज्ञान–कला–जीवनेत्यादिभिस्सह पृथक् पृथगाधारिता राष्ट्रीयैकता विपरिणमते। देशे नैकविधसम्प्रदायधर्मावलम्बिनः निवसन्ति। तेषामुपास्यमूलाप्रवृत्तिरपि भिन्ना–भिन्ना परन्तु संस्कृतं वेद–स्मृति–पुराण– साहित्यपथजुषां राष्ट्रियाणाङ्कृते समानाम्यवहारधारणां समीहते। वेदेषु यथा–

इला सरस्वती मही तिस्रो देवीमयो भुवः (ऋ. 1/13/9)

आ ब्रह्मन् ब्रह्मणो ब्रह्मवर्चसी जायतामाराष्ट्रे राजन्यः।

**राष्ट्रबोध-** सत्यमेव जयते नानृतं सत्येन पन्था विततो देवयानः। येनाक्रमंत्यृषयो ह्याप्तकामो यत्र तत्सत्यस्य परमं निधानम्॥

राजृ दीप्तौ धातोः ष्ट्रन् प्रत्यये कृते सति राष्ट्रशब्दो निष्पद्यते तेन राज्यं देशः साम्राज्यं जनपदं प्रदेशादिविषयेषु परिगण्यते ऋग्वेदे राष्ट्रशब्दः संगमनार्थे प्रयुक्तः:- अहं राष्ट्री संगमनी वसूनां चिकितुषी प्रथमा यज्ञियानाम्

ऋग्वेदानुसारं राष्ट्रं नाम दिदिगन्तपृथिव्याः धारणा शक्तिः इत्युद्देश्येन प्रयुक्तम्। सा च शक्तिः जनानां प्रकृतिप्रदत्तसमृद्धिनाञ्चानुप्राणिता । राष्ट्रस्य बोधः=राष्ट्रबोधः राष्ट्रबोध परिवेशपरकचेतनायां निहिता मनसो वचसः कर्मणश्चावधारणा आवश्यकी ।

सांस्कृतिकचेतना सर्वदेव सर्वत्र च प्रवहमाणा भवति । अस्मदीया संस्कृतिः वस्तुतः संघर्षचेतनायाः संस्कृतिः समवर्तत। अस्माकं संस्कृतौ आरब्धः मानबीयचेतनायाः अखण्डगौरवस्य बोधः अनुपमः। साहित्यं वस्तुतः संस्कृतिं राष्ट्रबोधं च संवहति ।

राष्ट्रनिर्माणे भाषाया अपि तादृशं महत्वं यथा अन्येषां तत्वानामस्ति। वेदराष्ट्रे समुत्पन्नाः सर्वेपि मनुष्या तस्य अमृत स्वरूपिणः परत्मानः एव पुत्राः सन्ति । वेदेषु सर्वेषां समैक्यं स्वीकृतमस्ति।

तथा हि श्रृण्वन्तु विश्वे अमृतस्य पुत्राः

यथा च सर्वाषां नदीनामाश्रयः एकमात्रं समुद्रः भवति। तथैव समेषां प्राणिनामेकमात्रम् आश्रयः ईश्वरः एव भवति। यथा विश्वं भवत्येकनीडम्"राष्ट्ररक्षायाः कृते सर्वे संप्रिक्ताः भवेयुः समानीव आकूतिः समानाः हृदयानि वः समानैव दृष्टिः समानेव च भिन्नभावोपेतो बोधो भवेत्।

मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे।

संदिग्धश्चमे सपीतिश्चमे इत्यादि वैदिकसंदर्भोः अहर्निशं अस्मदीयक्रियकलापेषु संदृश्यन्ते।

उद्घोषः - वयं राष्ट्रे जागृयाम् पुरोहितः।

मान्याः - राष्ट्रबोधो वा भवेत् राष्ट्रभक्तिः, राष्ट्रस्य समुन्नतिः,राष्ट्रस्य सामर्थ्य, साफल्यं, धर्मः प्रगतिः, विजयः आदर्शश्चेत्यादि सर्वे सन्दर्भा वेदोपहिता एव भवन्ति।

वस्तुतः राष्ट्रस्य कृते कर्तव्यबोधः एव राष्ट्रबोधः बाल्यकालादेव वयं मातृपितृभ्यां - आचार्येश्च उपदिष्यामहे मातुः कुन्त्यैव शिक्षया पाण्डवाः देशभक्ताः बोदधारः। राष्ट्रस्तम्भाश्च बभूवुः। उत्तरराचरितेयम् उक्तिर्भगवतो - रामस्य राष्ट्रबोधायैव आत्मानं प्रवर्तते -

अपि स्वर्णमयी लंका न मे लक्ष्मण रोचते।
जननी जन्मभूमिश्च स्वर्गादपि गरीयसी ।।

छिन्ने मूले नैव शाखा न पत्रम् इत्यादिदिशा सुक्ष्माधारः संस्कृतमेव ।

मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुत स्वसा ।
सम्यञ्चः सव्रता भूत्वा वाचं वदत भद्रया ।।

महाभारतयुद्धस्य मूलं कारणम् राष्ट्रकुलञ्च विनष्टम्।
अन्यच्च - जानाति विविधां भाषां जानाति विविधां कलां।
आत्मानं स न जानाति न जानाति संस्कृतम्।।

**ऐक्यभावा-**राष्ट्रस्य पूर्वाभिधानं ब्रह्मदेशः, आर्यावर्तः, भारतः इत्येतन्नामानि स्वातंत्रयात्प्राक् प्रचलितानि। तेषु भरतमधिकृत्यभारतदेशः, नवीनावधारणायां प्दकपं इतिनाम्ना नव्यः कश्चन पन्था सश्च आङ्गभाषाभाषकानन्तरं प्रकल्पितः प्रतीयते। एतेन प्राच्यपाश्चात्येत्युभयो– –र्नाम्नोरयं भारतदेशः समाश्रितो वर्तते। प्रथमं ब्रह्मदेशात् पाक–बङ्गेत्युभयोविर्भाजना– –नन्तरं केवलं भारतः एवं समनुष्ठितः–

उत्तरं यत्समुद्रस्य हिमाद्रेश्चैवदक्षिणम्।
वर्षं तद्भारतं भारती यत्रा संस्थितिः।।

आब्रह्मदेशकालादत्रा सर्वधर्मावलम्बिनो जनाः निवसन्तः सन्ति। अत्रात्याः ऋषयः सर्वजनहिताय सर्वजनसुखाय च स्वदिव्यैः चक्षुभिः

कालत्रायात्मिकानुभूतिः संसाधिता। सा च पूर्णत्वेन प्रतिफलिता दृश्यते–

गायन्ति देवा किल गीतकानि, धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते, भवन्ति भूयः पुरुषाः सुरत्वात्।। (ब्रह्मपु. 19/25)

इयं भारतभूमिः साक्षाद्देवानां कर्मभूमिरत्रैव राम–कृष्ण–परमहंस–शङ्कराचार्य–अरविन्द–महात्मागान्धिसदृशा विलक्षणमहापुरुषा अवतरिताः। अत्रैव अज्ञानध्वान्ताक्रान्ताय जगते वेदोद्घोष समवर्तत। एतेन वैदिकराष्ट्रसंस्कृतेरद्यापि श्रेष्ठत्वं प्रेष्ठच वर्तते। भारतस्योत्कृष्टतमत्वं गौरवमादाय आचार्यमनुना उच्यते–

एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।
स्वं स्वं चरित्रां शिक्षेरन् पृथिव्यां सर्वमानवाः।।

इत्थमपरिमितवैभवसमन्वितेयं दैवीवाक् प्राच्यभारते राष्ट्रभाषा पद्वीसमाश्रिता आसीत्। अस्यां भाषायां राष्ट्रीयतायाः बहूनि तत्त्वानि विद्यन्ते। पुराकाले विश्वस्य समस्तेषु देशेषु राष्ट्रभाषासंस्कृतं प्रति समादृता भावनासीत्। राष्ट्राणां मौलिकं चिन्तनमस्यां भाषा यामेव सम्पन्नं सेत्स्यते इति स्थितिः ज्ञायतऽस्माभिः एषा भाषा विश्वस्य सर्वमान्या आसीत्। यास्केन (700ई.पू.) पाणिनिना (5 शताब्दौ) कात्यायनेन (ई.पू. 4 शती) पतंजलिना(ई.पू.) महाभाष्येण च एवं प्रमाणीभवति यदियं भाषा जनसम्मान्या आसीत्। वैद्यराजचरकेण प्रथमशताब्दौ चरकसंहितायां वैद्यानां पारस्परिके वार्तालापे संस्कृतस्यैव प्रयोग उल्लिख्यते। चीनीयात्रीह्वेनसाङ्गेनोल्लिख्यते यत् सप्तमशताब्दौ बौद्धाः संस्कृतेनैव व्यवहरन्ति स्म। एकादशशतके राजाभोजानुसारेण धारानगर्याः सामान्यजनाऽपि पद्यरचनाकर्तुं समर्थोऽभवत्। प×चतन्त्रास्याध्ययनेन एवं ज्ञायते यत् पुराकाले राजपुरुषाणां प्रशासकानां वा शिक्षामाध्यमं संस्कृतेनैवासीत् एफ. डब्ल्यू. टामसस्य मान्यतानुसारं ब्राह्मणग्रन्थानाङ्काले पाश्चात्ये च धार्मिककृत्यशिक्षा–विज्ञानस्य च भाषा संस्कृतमेवासीत्।

सम्प्रति विश्वे संस्कृत–चीनी–ग्रीक–लेटिनेतिनाम्न्यः चतस्रः भाषाः सन्ति। यासु शब्दनिर्माणस्य सामर्थ्यं वर्तते। अत्रा संस्कृतस्य सर्वोच्चं स्थानमुपसर्गप्रत्ययादिभिः संयोज्य एकेन मूलधातुना असंख्यशब्दाः निर्मातुं शक्यन्ते। एतेन भाषागतसाहित्ये राष्ट्रैक्यं समाश्रितं संस्कृतस्य।शूर उषष्योऽतिव्याधी महारथो जायताम् (यजुर्वेद 22/22) माता भूमिः पुत्रोऽहं पृथिव्याः (अथर्व. 12/1/12) चतुर्ष्वपि वेदेषु नैकविधानि सूक्तानि त०तमंत्राणि च सन्ति यत्रा राष्ट्रियाणाङ्कृते मङ्गलमयी वाक् प्रशस्यते ऋषिभिः। वेदेषु समेषां योगक्षेमाय विश्वमङ्गलोद्भवाय च ऋषिचिन्तनप्रणाली भूमण्डलीयकरणे सदुपदेशसम्पादने ज्ञान–विज्ञानालोके च समर्था सशक्ता च तिष्ठति। नान्या–एतत्समा कापि भाषा किमपि च ज्ञानं, येन विभिन्नधर्मावलम्बिनां पारस्परिकं नियोजनं सम्भवेत्, हितसम्बद्धर्नं च भवितुं शक्नुयात्। संस्कृतवाचो द्वितीयप्रस्थानत्वेन पुराणानाङ्क्रम आयाति। तत्र हि पदे–पदे राष्ट्रीयमैक्यं समाहितं विभाति कानिचिदुदाहरणानि–

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने।
यतो हि कर्मभूरेषा ततोन्या भोगभूमयः।।
इ(विष्णु 2/3/24)

राष्ट्रपीडाकरो राजा नरके वसते चिरम्
(अग्नि. 223/7)

अहो भुवः सप्तसमुद्रवत्याः द्वीपेषु वर्षेष्वधिपुण्यमेतत्। गायन्ति यत्रात्यजनाः मुरारेः कर्माणि भद्राण्यवतारवन्ति।। (श्रीमद्भा.5/6/13)

अत्रात्याः कामना न मङ्गलदायिन्योऽपितु राष्ट्राभिनिवेशोपरि विशेषो विन्यासः संसाधितो व्यासेन श्रीकृष्णद्वैपायनेन। देशस्याखण्डतायामेवात्यन्तिकं सुखमत्रा काम्यते। अत्रा स्वाधीनतायाः सुखत्वेन पराधीनतायाश्च दुःखत्वेन मान्यता वर्तते। राष्ट्रनायकाः स्वार्थं परित्यज्य राष्ट्रसमुन्नत्यै प्रेरिता विलोक्यन्ते। मार्कण्डेयपुराणान्तर्गतं देवीसूक्तं, महाभारतमुपजीव्यप्रणीतानि काव्यानि वृहत्रायीरूपाणि। एतस्या एकतायाः समुत्कृष्टानि उदाहरणानि सन्ति। महाभारतरामयणयोः आदर्शराष्ट्र–आदर्शराजा–आदर्शसमाजविषये च समुज्ज्वलं वर्णनं संस्कृत एव नान्यस्यां भाषायाम्। रामायणे राज्याभिषेकस्य वनवासस्य च वृत्तान्तमुपश्रुत्य भगवति रामे लेशमात्रोऽपि क्लेशो न जायते–

न चास्य महती लक्ष्मीं राज्यनाशोपकर्षति।
लोककान्तस्य कान्तत्वातच्छीतरश्मेरिव क्षपा।।
(2/16/58)

अनिर्वेदः श्रियो मूलमनिर्वेदः परं सुखम्।

अनिर्वेदो हि सततं सर्वार्थेषु प्रवर्त्तकः।।

महाकवि रवीन्द्रनाथटैगोरमहोदयानुसारं रामायणे भारतस्य आत्मा संस्थापिता। अनेनैव भारतस्य वास्तविकं स्वरूपमवगन्तुं शक्नुमो वयम्। महाभारतन्तु राष्ट्रीयसंस्कृतेर्विश्वकोषः यन्न महाभारते तन्न भारते इत्युक्तिसमारम्भे समेषां राष्ट्रीयतत्वानामुन्मेषोऽत्रा दृष्टव्यः–

धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ।
यदिहास्ति तदन्यत्रा यन्नेहास्ति न तत् क्वचित्।।
धर्म एव हतो हन्ति धर्मो रक्षति रक्षितः।
तस्माद्धर्मो न हन्तव्यो मा नो धर्मो हतोवधीत्।।

मनुष्यत्वरूपो धर्मो महत्तम इत्येतन्मूलकः सन्देशदायोऽत्रा विश्वमूलक राष्ट्रीयत्वं च परिपुष्णाति।

इयमस्ति दैवीवाग् भारतस्यात्मा। अस्यां भाषायाम्–आसृष्टिकालाद्वेदपुराण– –कालादिदानीं यावत् व्यापकत्वेन प्रचारः प्रसारो विकासश्च सातत्येन समायाति। संस्कृतसमुपासकानां लेखनीक्रमः शाश्वतीमिमां धारामग्रेसारयति। मनश्च पौनःपुन्येनाध्ययनाय प्रेरयति। मनसि शिवसङ्कल्पार्थात् कल्याणमयी भावना जागर्ति। स्वातंत्र्यात्प्राक्कालिकं योगी–अरविन्दकृतं राष्ट्रभावनापूर्णं भवानीभारतीनामकं खण्डकाव्यमत्रा तेजोमयी राष्ट्रहितसाधिका प्रवृत्तिः प्रतिफलति। कविभिरत्र आङ्ग्लशासकानां पराधीनतया सचेतसा जनाः क्रियन्ते। प्रत्येकस्मिन् पद्ये तदन्ते वा "युध्वस्व भो! वंचक रक्षधर्मान्" "रक्ष स्वजातिं भवार्यः" राष्ट्रैक्यं प्रति सनद्धा भवन्तु, राष्ट्रं रक्षयन्तु इत्येषा वाणी कवेरत्रा दृग्गोचरीभवति। एकं पद्यं यथा–

उत्तिष्ठ भो जागृहि सर्जयाग्नीन् साक्षाद्धि तेजोऽसि परस्य शौरेः।

अप्पाशास्त्रिमहोदयस्य "पंजरबद्धः शुक"–इत्यस्याः कवितायाः अपि उद्भूतं पराधीनतायाः मार्मिकं चित्राणं स्वातंत्र्यात्प्राक्कालिकमेव। एतत्तु स्वातंत्र्याय प्रकल्पितङ्कविना वच एव। पराधैन्यं निवारणाय कवेः परिणतिरत्रा दृष्टव्यैव। कविवर्यमथुरानाथदीक्षितेन कृतं भारतविजयनामकं नाटकं यत्रा गान्धि–आन्दोलनेन भारतवर्षस्य स्वतंत्रमयी कल्पना प्रस्तुता विद्यते। पण्डितक्षमारावकृता सत्याग्रहगीता यत्रा स्वाधीनतां प्रति सत्याग्रहस्य स्थितिः स्पष्टा। एतद्वयं संस्कृतराष्ट्रविषयकं काव्यम्। स्वातन्त्र्योत्तरं सांस्कृतिकं सामाजिकं चैक्यं राष्ट्रप्राणभूतं संसाधनदन्यदपि काव्यम्। यथा– कवेर्हरिदासस्य वङ्गीयप्रतातमिति नाटकं यत्रा भारतीयपराधैन्यमपसारणाय कवेर्मनोदशा एवं व्यथां व्युत्पादयति–

विधिर्म्यधीना वत भारतप्रजा
नदीप्रवाहे पतिता लता यथा।
नैवोन्नतिं गच्छति निष्फलोद्यमा
परानुगत्यं हि लघीयसां क्रिया।।

भर्तृहरेरेकं पद्यं यत्रा कर्मसिद्धान्तोप स्थापनेन स्वीकरणेन च राष्ट्रैक्यं सम्वर्द्धते–

नमस्यात्रो देवान्ननु हतविधेस्तेऽपि वशगाः,
विधिर्वन्धः सोऽपि प्रतिनियतकर्मैकफलदः।
फलं कर्मायत्तं किममरगणैः किं च विधिना,
नमस्तत्कर्मभ्यो विधिरपि न तेभ्यः प्रभवति।।

वीरपृथ्वीराजनाटकं, कविविश्वेश्वरस्य चाणक्यविजयं, भारतविजयमादिनाटकेष्वपि राष्ट्रीयमैक्यं प्रामुख्येन ग्रथितं कविभिः। प्रबुद्धहिमाचले वैदेशिकाऽक्रमणेन आक्रान्ताः राष्ट्रकन्यका नवयुवकेषु राष्ट्रैक्यं सम्वर्द्धनाय गायन्ति–

वन्दे देशमातरम् लक्षवीर–जन्मदात्रीं
जगद्धात्रीं मातरम्।
जय विश्ववन्दिते जय सुखवन्दिते
पुण्यमहिम सुषमामयी वन्दे शुभां मातरम्।।

विश्वशान्त्यै संस्कृतमनिवार्यं येन भारतस्य प्रतिच्छविरद्यापि तदवस्था–

स्वस्ति प्रजाभ्यः परिपालयन्तां,
न्याय्येन मार्गेण महिं महीशाः।
गोब्राह्मणेभ्यो शुभमस्तु नित्यं,
लोकाः समस्ता सुखिनो भवन्तु।।

**निष्कर्षः** - इत्थं संस्कृते बहूनि उदाहरणानि दृष्टान्तानि च सन्ति यत्रा समग्रराष्ट्रस्य माङ्गल्यपरिणतिर्विलोकयितुं शक्यते। सांस्कृतिकविचारसरणिसमुन्नयने राष्ट्रहितसम्वर्द्धने च संस्कृतभाषाया प्रासङ्गिकत्वमितरभाषाभ्यो•धिकमेव। कलौ युगे सैव एकता संगठनमूला संजाता। संघे शक्तिः कलियुगे एतल्लोकप्रवृत्याः मूलोद्भावना संस्कृत एव।

सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।

अस्मिन् राष्ट्रीयैक्ये समुपबद्धा नैका भावाः पन्थानश्च विद्यन्ते। "पुनर्यास्यत्याख्यां भरत इति लोकस्य

भरणात्' इत्यनेन भरतस्य भावो भारतमेवंविध अत्रत्य संस्कृतिसंस्कृतनिष्ठविचारमन्थनेन ऐक्यभावाः बाहुल्येनात्रा राजन्ते। शाकुन्तलप्रोक्तभरतवाक्येन प्रजानां कल्याणकारकत्वेन भारतीयाः संस्कृतेः सरस्वत्याश्च सम्यक् संरक्षणमाशंसते। तथा हि–

प्रवर्त्ततां प्रकृतिहिताय पार्थिवः
सरस्वती श्रुतिमहती न हीयताम्।
ममापि च क्षपयतु नीललोहितः
पुनर्भवं परिगतशक्तिरात्मभूः।।

(अभि.शा. 7अंक 35)

अतः साररूपेण इदमेव वक्तुं शक्यते यदत्रात्यनीति–धर्म–विचार–संघादिसरणिरीत्या राष्ट्रैक्यं साधयितुं शक्यते।

**सन्दर्भ ग्रंथ सूची**


1. संस्कृत और राष्ट्र की एकता (लेखकः प्रो. राधावल्लभ त्रिपाठी; अक्षयवट प्रकाशन, इलाहाबाद) (विस्तरेणावगमनाय ग्रन्थमवलोकनीयम्)
2. संस्कृत और राष्ट्र की एकता, पृ. 169 (भवानी भारती)
3. संस्कृत और राष्ट्र की एकता, पृ. 16
4. नीतिशतकम् (भर्तृहरिविरचितम्: पद्य क्र. तत्रैव, पृ. 172


*****